# प्रथमस्तरीयः संस्कृत - सम्भाषण - वर्गः १२

पृष्ठं ३०

# यदा - तदा

यदा - तदा इति एते अव्ययपदानि। यदा - When तदा - Then

1. यदा भवती अवसरं प्राप्नोति तदा मम गृहम् आगच्छतु।

When you get a chance, then please come to my house.

2. यदा माता बालकान् भोजनाय आहूतवती तदा ते झटिति आगतवन्तः।

When mother calls boys for dinner, then they all immediately come.

3. यदा वयं मित्रस्य गृहं गतवन्तः तदा सः एकं गानं गीतवान् आसीत्।

When we went to friend's house, then he sang a song.

4. यदा वयं विमानेन गच्छामः तदा वातायनात् सम्पूर्णं नगरं द्रष्टुं शक्नुमः।

When we travel on a plane, then we can see the whole city through the window.

5. यदा पिता मङ्गलूरुनगरं गतवान् आसीत् तदा तत्र बहु वृष्टिः अभवत्।

When father went to Mangalore, then it rained heavily there.

# यदा - तदा

## अधोलिखितानि वाक्यानि पठतु अवगच्छतु च

**6. यदा भवान् आगच्छति तदा गच्छामः। अहं सज्जः अस्मि।**

**When you come, then we can go. I am ready.**

**7. यदा ते विपणीं गतवन्तः तदा तत्र सुन्दराणि वस्त्राणि स्थापितानि आसन्।**

**When they went to the market, beautiful dresses were kept there.**

**8. यदा मम भ्राता विदेश-प्रवासं कृतवान् तदा बहूनि आकर्षकाणि वस्तूनि आनीतवान्।**

**When my brother went on the foreign trip, he bought many interesting things from there.**

**9. यदा पितामही कथाः श्रावयति तदा वयं सर्वे तस्याः पार्श्वे उपविश्य कुतूहलेन शृण्मः।**

**When Grandmother narrates stories, then we all sit around her and listen with great interest.**

**10. यदा शिक्षकः पाठं बोधयति तदा छात्राः टिप्पणीपुस्तके लिखन्ति।**

**When teacher teaches then students write in the notebook**

# यदा – तदा – अभ्यासः

**उपरिदत्तानि उदाहरणानि दृष्ट्वा स्वस्य वाक्यानि लिखतु।**
**Looking at the example write your own sentences.**

1. यदा विद्यालयात् विरामः भवति तदा वयम् ------------------- ।
2. यदा वृष्टिः भवति ---------------------------------------------------।
3. यदा ग्रीष्मकालः भवति -------------------------------------------।
4. यदा उत्सवदिनम् आगच्छति ------------------------------------।
5. --------------------------------------------------------------------------।
6. ---------------------------------------------------------------------------।
7. --------------------------------------------------------------------------।
8. ---------------------------------------------------------------------------।
9. ---------------------------------------------------------------------------।
10. -------------------------------------------------------------------------।



# धन्यवादः